# Hymn on dharmAmbikA

# ધર્મામ્બિકાસ્તવઃ

## Document Information

Text title : Hymn on dharmAmbikA, the presiding goddess at Thiruvaiyaaru.

File name : dharmAmbikAstava.itx

Category : devii, otherforms, stotra, tyAgarAja, devI

Location : doc_devii

Author : tyAgarAja

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Latest update : November 22, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# ધર્મામ્બિકાસ્તવઃ

ત્યાગરાજવિરચિતઃ

કલ્યાણામૃતકામધેનુમહિલે કામપ્રિયાહર્ષદે
કારુણ્યામૃતવાપિકે પિકશિશુસ્વાનન્દસલ્લાપિનિ ।
કામેશપ્રિયકામકલ્પલતિકે કાદમ્બવાટીપ્રિયે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧ ॥

એણીબાલવિલોચને ફણિમણિશ્રેણીલસત્કઙ્કણે
તૂણીરાકૃતજઙ્ઘિકે ત્રિનયને સ્થાણોર્મનોહારિણિ ।
વાણીપાણિસરોજવાદિતલસદ્વીણાસ્વરાલાપિકે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૨ ॥

ઈશિત્વાદિવિભૂતિકસ્વવિભવે ઈકારસિંહાસને
ઇન્દ્રાણીપઠિતસ્તુતે ઇહપરત્રાણધ્વજે ઇન્દિરે ।
ઈશાનાદિસુરેન્દ્રસેવકજને ઈશાધિરાજેશ્વરી
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૩ ॥

લાવણ્યાબ્ધિપયોજવક્ત્રનયને લક્ષ્મીકરાલોકને
લક્ષ્મીકાન્તનિષેવિતાઙ્ઘ્રિકમલે લમ્બોદરશ્રીકરિ ।
લક્ષ્યાલક્ષ્યવિલક્ષણે ક્ષણવતાં સ્વાનન્દવૃદ્ધિપ્રદે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૪ ॥

હ્રીપાશાદિવિમોચનેઽતિચતુરે હૃદ્ગ્રન્થિવિચ્છેદિકે
હૃદ્યાનન્દસુધારસાર્દ્રમધુના સંતર્પણાહ્લાદિનિ ।
હ્રીંકારાર્થજગદ્વિલાસવિભવે વિદ્યે વિમર્શાત્મિકે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૫ ॥

હસ્તિશ્રેષ્ઠસુકુમ્ભસંનિભકુચે  હર્યક્ષમધ્યે શુભે
હેમાબ્જાનનપાણિપાદનયને ચન્દ્રાર્ધફાલે શિવે ।
હે મારારિમતેર્વિમોહદલસન્નીલાલકે નિર્મલે

દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૬ ॥

સત્યાનન્દચિદીશ્વરપ્રણયિની સૌભાગ્યરત્નાકરી
સામ્રાજ્યપ્રભુદેશિકેન્દ્રકરુણાસ્યન્દામૃતસ્વર્ધુની ।
સર્વાશારહિતસ્ય ભક્તહૃદયસ્યાનન્દકાદમ્બિની
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૭ ॥

કલ્પે કાલકલેશિ કલ્પકલને સંકલ્પસિદ્ધાખિલે
કાલાકાલવિભાગકલ્પનકલે કાલાન્તકપ્રેયસિ ।
કાલોપાધિવિવર્જિતે કલિમલપ્રધ્વંસિની કામદે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૮ ॥

હક્ષદ્વન્દ્વદલત્રિકોણવિલસજ્જ્યોત્સ્નાકલારાધિતે
હંસદ્વન્દ્વગતિપ્રબોધજનનશ્રીદેશિકેન્દ્રાત્મિકે ।
હંસારોહવિચક્ષણે અભયદે આનન્દસંવર્ધિની
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૯ ॥

લજ્જાનમ્રમુખે પ્રનૃત્યતિ શિવે લાસ્યપ્રિયે લક્ષણે
લક્ષ્યાર્થે લયવર્જિતે લલિતવાક્પીયૂષસંદોહિનિ ।
લક્ષ્મીમાનસરાજહંસિ લલિતે લામજ્જગન્ધપ્રિયે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૦ ॥

હ્રીંકારે હૃદયત્રિકોણનિલયે હૃદ્યે સુરારાધિતે
હ્રીંકારધ્વનિલીનચિત્તસુલભે હૃષ્ટેશ્વરેષ્ટેશ્વરિ ।
હ્રીંકારાગ્નિમુખપ્રશાન્તકલનાસર્વજ્ઞસામ્રાજ્યદે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૧ ॥

સત્યાસત્યવિવર્જિતે સમરસે સંવિલ્લતે શાશ્વતે
સર્વજ્ઞાનવિબોધિનીશકરુણે સૌભાગ્યવિદ્યામયિ ।
સચ્ચિત્સૌખ્યવિલાસકેલિકુતુકે સર્વાપવર્ગાત્મિકે
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૨ ॥

કર્માકર્મવિવર્જિતે કવિમુખે વાગ્વૃષ્ટિકાદમ્બિની
કાવ્યાલાપવિબોધિનીશકલિકે કૌમારિ કાત્યાયનિ ।
કાન્તાર્ધેન્દુવિભૂષણે સ્મરકલે શ્રીકામકોટીશ્વરી
દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૩ ॥

લબ્ધશ્રીકમલાલયાલયલસત્કામેશ્વરપ્રેયસી
    લાક્ષારક્તરસપ્રલિપ્તચરણદ્વન્દ્વે લઘુશ્યામલે ।
લૌહિત્યચ્છવિપાટલીસુમપદે પર્યાપ્તકામપ્રદે
    દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૪ ॥

હ્રીંકારોત્થિતનાદસંતતિસુધાધારાભિસંતર્પિતે
    હ્રીંકારત્રયમન્ત્રવિદ્રુમલતાજ્યોતિઃસ્વરૂપે પરે ।
હ્રીંકારાક્ષરરૂપિણિ ત્રિભુવનશ્રીરાજરાજેશ્વરી
    દેહિ શ્રીપદપદ્મભક્તિમનિશં ધર્મામ્બિકે શ્રીશિવે ॥ ૧૫ ॥

મૂલાલવાલજપરાવિટપિપ્રસૂનૈ-
    રભ્યર્ચિતા શ્રુતિરહસ્યસુગન્ધગન્ધૈઃ ।
પ્રસ્પન્દિધીપવનચાલિતવાઙ્મયૈસ્ત્વં
    ત્યાગાધિરાજમહિષી વરદે પ્રસીદ ॥ ૧૬ ॥

ઇત્યાનન્દનાથપાદપદ્મોપજીવિના કાશ્યપગોત્રોત્પન્નેનાન્ધ્રેણ
ત્યાગરાજનામ્ના વિરચિતઃ ધર્મામ્બિકાસ્તવઃ સમ્પૂર્ણઃ ।

This is a hymn on dharmAmbikA, the presiding goddess
at ThiruvaiyAru.
Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

---

*Hymn on dharmAmbikA*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*